National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2025; 1(59): 229-231
© 2025 NJHSR
www.sanskritarticle.com

**Priyanka Panda**
Research Scholar,
Dept. Of Sahityam,
National Sanskrit University,
Tirupati

**Correspondence:**
**Priyanka Panda**
Research Scholar,
Dept. Of Sahityam,
National Sanskrit University,
Tirupati

# आचार्यव्रजकिशोरनायकमहोदयस्य कृतिषु भक्तिभावः

**प्रियङ्का पण्डा**

**उपोद्घातः**

संस्कृसाहित्यजगति काव्यारचनायां रसस्य समावेशः सर्वत्र दृश्यते। आचार्यव्रजकिशोरनायकमहोदयेन रचितेषु कृतिषु वहुविधानि तत्त्वानि परिलक्ष्यते, तेषु भक्तिभावः वहुत्र विद्यत्येति अत्र तेषां महोदयानां कृतिषु भक्तिभावस्य समावेशः अत्र वर्ण्यते।

रस्यते आस्वाद्यते इति रसः। रससंख्याविषये आलङ्काराणां मतभेदाः दरीदृश्यन्ते। तत्र भरतमहोदयेन रसाः अष्टाः इति स्वीकृताः। केचन नव केचन दश इत्यपि स्वीकुर्वन्ति। दशरुपककारमते अष्टावेव रसाः इति प्रदर्शितम्। तत्र शृङ्गार-वीर-वीभत्स-रौद्राणां मुख्यत्वम् एभ्यो यथाक्मामित्पन्नां हास्याद-भूतभयानककरुणानां गौणत्वम्। प्रधानरसेषु चतस्रो मानसिकवृत्तयः। या प्रधानरसोत्पन्नगौणरसेषु तिष्ठन्ति। एवं प्रकारेण मुख्यत्वं गौणत्वम् इति द्विधाऽपि कृतम्।

**भरतेन उक्तम्-**

**शृङ्गारहास्यकरुणरौद्रवीरभयानकाः।**
**वीभत्सोऽद्भूत इत्यष्टौ रसा नाट्ये इति स्मृताः॥**[1]

**भक्तेः रसत्वम्-**

मम्मटभट्टः काव्यप्रकाशे देवादिविषयिणीरर्ति भावेषु अन्तर्भावयति। रतिः देवादिविषया व्यभिचारी तताञ्जितः, भावः प्रोक्तः इति। रूपगोस्वामिप्रभृतयः भक्तिरेव मुख्यरसः, इतरे गौणाः इति मम्तटमतं निराकृतवन्तः। भज्यते सेव्यते अनया इति भक्तिः इत्यत्र करणव्युत्पत्त्या भक्तिशब्देन साधनं गृह्यते। तदुक्तं भक्तिरसायने श्रीमधूसूदनस्वरस्वतीपदैः-

**भक्त्या मामभिजानाति यावान् यश्चास्मि तत्त्वतः।**
**ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरम्॥**[2]

प्रसिद्धः वैष्णवाचार्यः रूपगोस्वामी भक्तिरसामृतसिन्धौ भक्तिरसः एव प्रधानः इति विवेचयामास। 'भज्' धातोः सेवायां निष्पन्नः भक्तिशब्दः भगवद्विषयकसेवां सूचयति। स्वतः रागस्याभावे विधिवाक्या-नामाधारेण केवलशास्त्रानुशासनेन अनुष्ठानं वर्त्तते, सा विदिः भक्तिः इत्युच्यते। नातिशक्तवैराग्यभाक् इति पदाभ्यां प्रसिद्धकर्ममार्गात् ज्ञानमार्गाच्च भक्तिमार्गः भिन्नः दृश्यते।

**भक्तिलक्षणम्-**

**अन्याभिलाषिताशून्यं ज्ञानकर्माद्यनावृतम्।**
**आनुकूल्येन कृष्णानुशीलनं भक्तिरुत्तमः॥**[3]

भक्तिभावः इत्युक्ते न केवलं देवी-देवान् प्रति भक्ति तता पूजार्च्चना। भक्तिभावः तु जावनस्य प्रत्येकस्मिन् भागे दृश्यते एव। यथा-मातृपितृभक्तिः, गुरुभक्तिः, देशभक्तिः इत्यादि। आचार्यवरेण रचितपुस्तकेषु देवीमहिमविलसितम्, श्रीमज्जगद्गुरुशङ्कराचार्यस्वामिभारतीतीर्थविभूतिवैभवम्, जानकीवल्ल्भचरितम् आदि लघुकाव्ये भक्तिभावं परिदृश्यते।

**देवीमहिमविलसिते** परमशक्तेः महात्म्यं तथा भिन्नानि नामानि लक्ष्यन्ते। शक्तिं विना प्राणीविशेषाः किमपि कर्त्तुं असमर्थाः। का कथा प्राणीविशेषस्य शक्तिं विना शिवः शव इव प्रतिभाति।

भारतवर्षे नैकानि शक्तिपीठानि विद्यन्ते। उत्कलराज्ये बहुलतया सर्वत्रैव शक्तिमन्दिराणि बहुकालात् दृश्यन्ते। प्रस्तुते

लघुकाव्ये तासां शक्तिनां तथा शक्तिपीठानां नाना नाम विराजन्तेऽत्र। शक्तीनां नामग्रहणपूर्वकं सामान्यतया वर्णितमस्ति। चत्वारि छन्दांसि व्यवहृत्य पद्यानि विरचितानि। वियोगिनीछन्दो बहुलतया दृश्यते काव्येऽस्मिन्। प्रसादगुणविशिष्ट तथा सरलभाषया वर्णितम्। अस्मिन् लघुकाव्ये ओडिशाप्रान्तस्तित शक्तिपीठानां नाम-ग्रहणपूर्वकं भक्तिभावपूर्णहृदयेन श्लोकैः वर्णितम्। यथा-

**जयताज्जनपालनेऽम्बिका**
**जगतः संहरणेऽथ चण्डिका।**
**सततं भवपादसेवका**
**जयताद् दक्षिणपूर्वकालिका॥**[4]

या समग्र-संसार-पालनकरणे अम्बिका, संहार-समये चण्डिका, सर्वदा महादेव-सेवापरायणा सा देवी दक्षिणकालेः जयं भवतु।

**जयतात् कविसेव्यशारला**
**जयतात् काकटवासमङ्गला।**
**विमला पुरुषोत्तमेश्वरी**
**जयतात् साभयहस्तका बला॥**[5]

कविभिः सदा सेविता देवी शारला, काकटपुरवासिनी देवी मङ्गला, श्रीक्षेत्र राजेश्वरी, अभयहस्ता, शक्तिमयी विमलादेव्याः जयं भवतु।

**कृपया तव शारलाकविः**
**सुबृहद्भारतकाव्यलेखने।**
**अलमेव बभूव भाषया**
**भवदीया कुरुते न किं कृपा॥**[6]

हे देवी ! भवत्याः कृपया शारला दास नाम कविः ओडिआ-भाषायां महान् महाभारत-काव्यं लिखित्वा समग्र-ओडिशायां चिरस्मरणी-यम्। भवत्याः कृपां विना कोऽपि एतादृश-कार्ये असमर्थः प्रायः।

**प्रस्तुतकाव्ये वर्णितानि देवीनाम् नामानि-** जगत्पालिनी देवी दक्षिणकाली,काकाटपुरवासिनी माता मङ्गला, शक्तिमयी विमला, मणिनागपर्वतवासिनी माता मणिनागेश्वरी, सम्बलपुरस्थित माता समलेश्वरी, पुरी निकटस्थ द्वी हरचण्डी, कटकस्याधिष्ठत्री देवी चण्डिका,याजपुरस्थित माता विरजा, केन्दुझरे संकटहारिणी माता तारिणी आदिभिः नामभिः कथं प्रत्येकस्मिन् स्थाने विराज्य भक्तानाम् दुःखनिवारयन्ति इति वर्ण्यते।

**श्रीमज्जगद्गुरुशङ्कराचार्यस्वामिभारतीतीर्थविभूतिवैभवम्-**

पुण्यपावने शारदापीठेऽत्यनतं शान्त सर्वविद्यानिष्णान्ताः गीर्वा-णवाणीभाषणोऽनर्गलं सुकुशलिनो जितेन्द्रिया यदिवरा जगद्गुरवो भारतीतीर्थमहाभागाश्चन्द्रशेखरभारतीनां प्रशिष्या अभिनवविद्या-तीर्थानां सुयोग्या अन्तेवासिनोऽधुना विधुशेखरस्वामीमहोदयेषु स्वीयशिष्यप्रवरेषु मठीयं निखिलं दायित्वं समारोप्य ध्यानरता

अनारन्तं चकासति। महामान्या जगद्गुरवो भारतीतीर्थपादा न केवलं वेदवेदाङ्गवेदान्तादिशास्त्रनिष्णाता अपितु ते महाकवयो विद्यन्ते। तेषां रचना, गुणगान प्रशंसया कविना शताधिकं पद्यैः विरचितमिदं 'जगद्गुरुभारतीतीर्थविभूतिवैभवं'।

भक्तेः विषये संसारे सर्वेषाम् भिन्नं भिन्नं मतं विद्यते। अस्माकं सनातनधर्मस्य मूलतत्त्वरूपेण वेद-उपनिषद्-दर्शनानि-पुराणानि आदीनां पठने पाठने अवबोधनेऽपि भक्तिभावस्य प्रदर्शनं भवति स्वस्य तथा समाजं प्रति।

**कैलासं हरसान्निध्यमवाप्तुं यतिपुङ्गवः।**
**ततो गत्वा स पार्थिवीं स्वतनुं तनुम्॥**[7]

**गुरुभक्तिः-**

**शैवे प्रदेशे कलिपङ्कशून्ये लसन्महाकालपवित्रपीठे।**
**गुरोः पदाब्जे निवसनमनस्वी पपाठ वेदान्महतोऽऽदरेण॥**[8]
**गुरोः पदद्वन्द्वमभीष्टसिद्धयै ध्यायन्मनीषी मतिमानमनस्वी।**
**गार्वाणवाणीं कथयन् विशुद्धामनर्गलं सर्वमनो जहार॥**[9]

पवित्रे शारदापीठे शैवे प्रदेशे यत्र कलिकालजनितपङ्कशून्यता महाकालस्य पवित्रपीठे लसति, तत्र स्वगुरुणा समं वसन् विनीतो वेदान् महतो आदरेण पपाठ। बुद्धिमान् तथा मनस्वीजनः स्वकामनापूर्त्यर्थं स्वगुरुचरणकमले ध्यानरतः भवति। उच्च-शुद्ध-निर्दोषस्वरेण कथयन् गुरुः शिष्यान् जहार।

**जानकीवल्लभचरिते** प्रमुखतया देशभक्तिः गुरुभक्तिः देवभक्तिः च विषये वर्ण्यते-

**देशभक्तिः-**

**राजन्यवंश्या निवसन्ति यत्र**
**स्वाधीनतित्ताः खलु देशभक्ताः।**
**युयुत्सवस्ते बलिनो महान्तः**
**पराक्रमिक्षत्रियधर्मशीलाः॥**[10]

यत्र स्वतन्त्रबुद्धिविशिष्टाः जनाः वास्तवदेशभक्ताः, यत्र राजवंशाः तिष्ठन्ति। ते क्षत्रियरूपेण पराक्रम तथा धर्मयुक्ताः अत्यन्त बलवान् पराकमी च आसीत्।

**गुरुभक्तिः-**

**प्राणेश्वरश्रीरथवीरभद्रान्**
**विज्ञानिनः शिक्षकरत्नभूतान्।**
**यद्रामजातान् वसुधासुरांस्तान्**
**पूजायान्गुरुन्नौमि सदा विनीतः॥**[11]

प्राणेश्वरश्रीरथवीपभद्रान् शिक्षकरत्नभूतान् विज्ञानिनः यद्राराम-जातान्वसुधारांस्तान् पूज्यान् गुरुन् सदा नमस्करोमि।

**देवभक्तिः-**

**सीतापते दशरथात्मज राम राम**
**नेत्राभिराम पुरुषोत्तम राम राम।**

**मां पाहि पाहि शरणागतमेव दीनं**
**लोकाभिराम रघुनायक देहि पुत्रम्॥**[12]

अत्र काव्यनायकः जानकीवल्लभपट्टनायकः प्रभु मर्यादा-पुरुषोत्तम-श्रीरामचन्द्रमं भिन्न-भिन्न-नामभिः भक्तिं प्रदर्शयति। यथा-सीतापतिः, दशरथात्मजः, नेत्राभिरामः, पुरुषोत्तमः, लोकाभिरामः, रघुनायकः शरणागतं एनं दीनं पुत्रधनं देहि इति।

**j'सदाशिवप्रशस्तिशतकम्'** काव्ये देशभक्तिः, गुरुभक्तिः, देवभक्तिः च...

**देशभक्तिः-**

**स्वाधीनतायै खलु भारतस्य**
**दिवाकरो यत्र रघुश्च वीरौ।**
**स्वजीवनं तौ प्रददौ समीके**
**चिरं सुपुज्यौ निजदेशभक्त्या॥**[13]

भारतस्य स्वतन्त्रतायै यौ देशभक्त्या दिवाकर-रघुरिवौ वीरौ स्वजीवितौ प्रददौ ते स्वदेश-निमित्तं समर्पित भुत्वा चिरसम्मानिताः।

**गुरुभक्तिः-**

**गुरुनिर्देशेन स शान्तचित्तः**
**साहित्यशास्त्रं सुमहत्सुरम्यम्।**
**स्वयं पपाठ प्रतिपङ्क्ति धीमान्**
**वेदान्तशास्त्रञ्च ततो महीयः॥**[14]

स्व-आध्यात्मिकगुरोरादेशेन काव्यनायकः सदाशिवदासः स शान्तचित्तः सुमहत् सुरम्यं साहित्यशास्त्रं अधितवान्। ततो एतेन महोदयेन स्वयं वेदान्तशास्त्रं प्रतिपङ्क्तिभिः सह अधीतम्।

**देवभक्तिः-**

**यदा ग्रहाच्छ्रीलडुकेश्वरराख्यो**
**देवो जनानामिह यो विमुक्त्यै**
**लोकत्रितापस्य हरो महेशो**
**विराजते पर्वतपाददेशे॥**[15]

अत्र कविना ओडिशाराज्यस्थित नयागडे प्रसिद्ध शिवमन्दिरं श्रीलडुकेश्वर नाम्ना प्रसिद्धम्। यः देवः जनानां मुक्तिनिमित्तं प्रकटितः लोकत्रितापस्य हरो महेशः पर्वतपाददेशे विराजते।

**उपसंहारम्-**

उपरोक्तविषयेषु कथं विविधक्षेत्रे भक्तिभावस्य उपस्थितता भवति तथा भक्तिभावस्यावश्यकता जीवने प्रत्येकस्मिन् स्थले विद्यत्येति प्रतीयते।

**संदर्भ-ग्रन्थाः**

1.व्रजमाधुरी
2.देवीमहिमविलसितम्
3.व्रजमाधुरी
4.जानकीवल्लभचरितम्
5.जगद्गुरुभारतितीर्थविभूतिवैभवम्

**उपयुक्तग्रन्थसूचीः –**

1.भरतमुनिः, नाट्यशास्त्रम्, भारतीविद्याभवन, 1985
2.श्रीमद्भागवत-महापुराणम्, गीताप्रेस् गोरखपुर, 2010
3.काव्यादर्सः, दण्डी, चौखम्बाप्रकाशन, वाराणासी,1972

**पाद टिप्पणी : -**

[1]नाट्यशास्त्रम्-6.15
[2]श्रीमद्भावतम्.2.3.10
[3]भ.सि-1.11
[4]दे.म.वि-श्लो.18
[5]दे.म.वि-श्लो.26
[6]दे.म.वि-श्लो.48
[7]श्री.श.स्वा.भा-श्लो.43
[8]श्री.श.स्वा.भा-श्लो.61
[9]श्री.श.स्वा.भा-श्लो.65
[10] जा.च-35
[11] जा.च-41
[12] जा.च-19
[13] स.प्र-श्लो.54
[14] स.प्र-श्लो.54
[15] स.प्र-श्लो.2